# देवतादिप्रत्ययनिर्णयः

**Dr. G. S.V. Dattatreya Murthy**
Assistant Professor
Department of Sanskrit & IC
SCSVMV (Deemed to be university)
Enathur, Kanchipuram - 631561

सास्यदेवता इति सूत्रेण प्रथमान्तात् षष्ठ्यर्थे अणादिप्रत्ययाः विधीयन्ते। षष्ठ्यर्थः यद्यपि संबन्धः, तथापि तद्धितप्रत्ययस्य सम्बन्धिनि शक्तिरङ्गीक्रियते, ऐन्द्रं हविः इत्यादि सामानाधिकरण्यानुरोधात्। तस्मात् देवतोद्देशेन त्यज्यमानं द्रव्यम्, तत्र कारणभूतो मन्त्रो वा तद्धितार्थः।

अत्र तद्धितार्थः कः इत्यत्र सन्ति बहवः पक्षाः। अत्र केचित् वैश्वदेवीत्यादितद्धितस्य देवतात्वविशिष्टे देये शक्तिः। प्रातिपदिकार्थस्य प्रत्ययार्थैकदेशे देवतात्वे देवतात्वस्य च निरूपकत्वेन देये अन्वयः। ससम्बन्धिकत्वात् एकदेशान्वयेपि न दोषः। आमिक्षापदे तु प्रकरणविशेषोपस्थाने तद्धितस्य तात्पर्यग्रहकत्वमिति। अन्ये तद्धितस्य देये शक्तिः, देवतात्वे निरूढालक्षणा, कृत्प्रत्ययानां कर्तृवाचिनां कृताविव विश्वदेवप्रातिपदिकार्थस्य लक्षितदेवतात्वे अन्वयोङ्गीक्रियते व्युत्पत्तिवैचित्र्यात् इति वदन्ति। वस्तुतः सूक्ष्मदृष्ट्या परिशील्यमाने सन्ति देवताप्रत्ययार्थविषये त्रयोदशपक्षाः। ते च-

1.देवतात्वविशिष्टे देयविशेषे आमिक्षादौ प्रत्ययस्य शक्तिः। आमिक्षादिकं तु तात्पर्यग्राहकमित्येकः।

2.प्रत्ययस्य देये शक्तिः, देवतात्वे निरूढलक्षणेति द्वितीयः।

3. तद्धितार्थः द्रव्यविशेष एव। देवतात्वं प्रकृतिप्रत्ययार्थयोः संसर्गः इति तृतीयः।

4.देवतात्वं तद्धितार्थः देयस्याक्षेपलभ्यत्वमिति चतुर्थः।

5.प्रत्ययस्य देवतात्वविशिष्टतत्तद्व्यक्तित्वादौ शक्तिः, व्यक्तिलाभस्तु आक्षेपादिति पञ्चमः।

6.प्रत्ययस्य तत्तद्व्यक्तित्वादेव शक्तिः,देवतात्वे निरूढलक्षणेति षष्ठः।

7. प्रत्ययस्य तत्तद्व्यक्तित्वादौ शक्तिः। प्रकृतिप्रत्ययार्थयोः संसर्गः देवतात्वमिति सप्तमः।

8.देवताविशिष्टं देयं प्रत्ययार्थः इति अष्टमः।

9.देवता देयं च एकवृन्तगतफलद्वयन्यायेन प्रत्ययार्थ इति नवमः।

10.प्रत्ययस्य देये शक्तिः, देवतायां निरूढालक्षणेति दशमः।

11.देये एव प्रत्ययस्य शक्तिः,देवतात्वविशिष्टदेवतायां प्रकृतेर्निरूढलक्षणेत्येकादशः।

12.देवतात्वं प्रकृत्यर्थः, प्रदेयमात्रं प्रत्ययार्थः इति द्वादशः।

13.सम्बन्धित्वेन सम्बन्धिसामान्यं प्रत्ययार्थः। आमिक्षादिशब्दाः तद्विशेषबोधकाः इति त्रयोदशः।

एवमनेके पक्षाः स्वीकर्तुं शक्यन्ते, यतः इयं वृत्तिः, अतः तत्तदर्थनिर्णये महान् आदरः नास्ति शास्त्रकाराणाम्।।

*********************